# ॥ वेदसार शिव स्तोत्रम् ॥

## ॐ नमः शिवाय

# Full Disclaimer

*This book is for educational, inspirational, and cultural purposes only. The remedies, rituals, affirmations, breathing methods, and spiritual practices described are based on traditional beliefs, historical customs, and personal development principles. They are not guaranteed solutions.*

*This book does not replace advice from licensed doctors, psychologists, financial advisors, lawyers, or other qualified professionals. If you have medical symptoms, mental health concerns, legal matters, or financial risk, seek professional help.*

*Use all remedies responsibly, ethically, peacefully, and according to local law. Do not use fire, herbs, fasting, incense, or physical practices in unsafe ways. The author and publisher are not liable for misuse.*

*Results in life depend on effort, discipline, timing, environment, skill, and many other factors. No spiritual method guarantees money, marriage, success, healing, or protection.*

Hargharpanditji
"PUJA ON YOUR SCREEN, BLESSINGS AT YOUR DOOR"

# ॥ वेदसार शिव स्तोत्रम् ॥

॥ पशूनां पतिं पापनाशं परेशं
गजेन्द्रस्य कृत्तिं वसानं वरेण्यम् ।
जटाजूटमध्ये स्फुरद्गाङ्गवारिं
महादेवमेकं स्मरामि स्मरारिम् ॥१॥

॥ महेशं सुरेशं सुरारातिनाशं
विभुं विश्वनाथं विभूत्यङ्गभूषम् ।
विरूपाक्षमिन्द्वर्कवह्नित्रिनेत्रं
सदानन्दमीडे प्रभुं पञ्चवक्त्रम् ॥२॥

॥ गिरीशं गणेशं गले नीलवर्णं
गुणातीतरूपं भवं भास्वराङ्गम् ।
भस्मना भूषिताङ्गं भवानीकलत्रं
भजे पञ्चवक्त्रं भवानीपतिं तम् ॥३॥

॥ शिवाकान्त शम्भो शशाङ्कार्धमौले
महेशान शूलिन् जटाजूटधारिन् ।
त्वमेको जगद्व्यापको विश्वरूपः
प्रसीद प्रसीद प्रभो पूर्णरूप ॥४॥

॥ परात्मानमेकं जगद्बीजमाद्यं
निरीहं निराकारमोंकारवेद्यम् ।
यतो जायते पाल्यते येन विश्वं
तमीशं भजे लीयते यत्र विश्वम् ॥५॥

॥ न भूमिर्न चापो न वह्निर्न वायुः
न चाकाशमास्ते न तन्द्रा न निद्रा ।
न चोष्णं न शीतं न देशो न वेशो
न यस्यास्ति मूर्तिः त्रिमूर्तिं तमीडे ॥६॥

# ॥ वेदसार शिव स्तोत्रम् ॥

॥ अजं शाश्वतं कारणं कारणानां
शिवं केवलं भासकं भासकानाम् ।
तुरीयं तमःपारमाद्यन्तहीनं
प्रपद्ये परं पावनं द्वैतहीनम् ॥७॥

॥ नमस्ते नमस्ते विभो विश्वमूर्ते
नमस्ते नमस्ते चिदानन्दमूर्ते ।
नमस्ते नमस्ते तपोयोगगम्य
नमस्ते नमस्ते श्रुतिज्ञानगम्य ॥८॥

## फलश्रुति

॥ वेदसारशिवस्तोत्रं यः पठेत् श्रद्धयान्वितः ।
सर्वपापविनिर्मुक्तः शिवसायुज्यमाप्नुयात् ॥ ॥

## स्तोत्र का महत्व

भगवान शिव की कृपा प्राप्त होती है।
मन को शांति और आध्यात्मिक शक्ति मिलती है।
भय, तनाव और नकारात्मकता दूर होती है।
शिवभक्ति और आत्मज्ञान में वृद्धि होती है।